दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णत्रयोदशी
कार्तिक 22 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-6 ■ अङ्क-13 | 1 | नवम्बर 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रीय-मन्त्रिणा डॉ. जितेन्द्र सिंहेन राष्ट्रव्यापी-अङ्कीय-जीवन-प्रमाणपत्र-अभियानस्य पञ्च-दशांश-शून्यस्य सूत्रपातः अकारि

4 अयोध्यायां त्रिंशल्लक्षदीपैः रचिष्यते नूतनः कीर्तिमानः; एकविंशतिशतं (२१००) द्रोणविमानानि प्रदर्शयिष्यन्ति रामायणम्; ज्ञायताम् कीदृश्यः सन्ति सज्जाः?

9 धन्वन्तरिजयन्त्यां आयुर्वेदस्य आधुनिकचिकित्सायाश्च समन्वये विमर्शः

रेलमन्त्रालयेन उत्सवेषु यात्रिणां सौकर्यार्थं प्रायः अष्टादश-सहस्रं (१८,०००) विशेषरेलवाहनानि प्रचालितानि



हिमसंस्कृतवार्ता नवदेहली।
दीपावली-छठ-पर्वयोः अवसरे यात्रिणां सौकर्यार्थं भारतीयरेलमंत्रालयेन प्रायः अष्टादश-सहस्रं (१८,०००) विशेषरेलवाहनानि चाल्यन्ते। रेलमन्त्री अश्विनी वैष्णवः गतदिने सायं नवदेहल्याः रेलस्थानकस्य निरीक्षणानन्तरम् एतां वार्तां न्यवेदयत्।तेन प्रोक्तं यत् गतवर्षे उत्सवावसरे द्वादश-सहस्राधिकानि (१२,०००) विशेषरेलवाहनानि प्रचालितानि आसन्। नवदेहली-रेलस्थानके सामान्यदिनेषु प्रतिदिनं पञ्चलक्षतः अधिकाः यात्रिणः आगच्छन्ति, किन्तु उत्सवेषु एषा संख्या संवर्ध्य प्रायः अष्टलक्षमिता भवति।रेलमन्त्री अकथयत् यत् यात्रिणां सम्मर्दं नियन्त्रयितुम् अतिरिक्तानि रेलवाहनानि चाल्यन्ते, तथैव रेल-सुरक्षाबलस्य (RPF) सैनिकानां विनियोजनम् अपि संवर्धितम् अस्ति।तेन प्रतिपादितं यत् यात्रिणां गमनागमनस्य अवलोकनाय जनसम्मर्दस्य च प्रबन्धनाय नवदेहली-रेलस्थानके कृत्रिमबुद्धि-युक्ताः (AI) सप्तशताधिकाः (७००+) दूरवीक्षण-यन्त्राः (कैमरा-यन्त्राः) संस्थापिताः सन्ति।अस्मिन् वर्षे आरक्षित-अनारक्षित-वर्गयोः यात्रिभ्यः पृथक्-पृथक् प्रतीक्षालयाः निर्मिताः वर्तन्ते। उत्सवावसरे अत्यधिक-जनसम्मर्दयुक्तेषु देशस्य अन्येषु अपि प्रमुख-रेलस्थानकेषु एतादृशी व्यवस्था कल्पिता अस्ति।

गृहमन्त्री अमितशाहः देहरादून-नगरे पञ्चसप्तत्यधिक-चतुर्दशशत-कोटिरूप्यकाणां विकास-परियोजनानाम् उद्घाटनं शिलान्यासञ्चाकरोत्



केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः उत्तराखण्ड-राज्य-स्थापना दिवसावसरे पञ्चसप्तत्यधिक-चतुर्दशशत-कोटिरूप्यकाणां विविधानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्। अयं समारोहः देहरादूने परेड ग्राऊंड-क्रीडाङ्गणे सम्पन्नः, यत्र आहत्य त्रिषष्टि-परियोजनानाम् उद्घाटनं आधारशिला स्थापनं च समजायत्। समागतं जनसमूहं उद्बोधयन् श्रीशाहः अवोचत् यत् भूतपूर्व प्रधानमन्त्री भारतरत्नः अटलबिहारी-वाजपेयी-महोदयः द्विसहस्रतमवर्षस्य नवम्बरमासस्य नवमे दिनाङ्के उत्तराखण्डाय पृथकत्वं राज्यत्वं प्रदाय जनसामान्यानां चिरप्रतीक्षिताम् अभीप्साम् अपूरयत् केन्द्रीय-मन्त्रिणा मुख्यमन्त्रिणः पुष्कर सिंह-धामिनः नेतृत्वे राज्ये जायमानानां विकास-कार्याणां विशेषतया उल्लेखः अकरोत्। सः सीमवर्ति-क्षेत्रेषु मार्ग-सम्पर्क-सुदृढ़ीकरणाय केन्द्र-सर्वकारस्य अविश्रान्त-प्रचेष्टाः विज्ञापयत् ।

उत्तराखण्ड-राज्य-आरक्षि-बलाय प्रतिष्ठितं 'राष्ट्रपति-आरक्षि-चिह्नं' प्रायच्छत् अमितशाहः

अमितशाहः देहरादूने आयोजिते एकस्मिन् गरिमामये समारोहे उत्तराखण्ड-राज्य-आरक्षि-बलाय प्रतिष्ठितं 'राष्ट्रपति-आरक्षि-चिह्नं प्रायच्छत्। एतेन सह उत्तराखण्डं देशस्य षोडशं तादृशं राज्यम् अभवत् येन इदं सर्वोच्चं राजकीय-गौरवं सम्प्राप्तम् । समारोहं सम्बोधयन् श्रीशाहः अवोचत् यत् राज्यस्य स्थापनायाः पञ्चविंशति-वर्षेषु उत्तराखण्ड-आरक्षि-बले सेवारतानां समेषां कर्मचारिणाम् अधिकारिणां च कृते अयं क्षणः अतीव गौरवपूर्णः वर्तते। गृहमन्त्रिणा राज्ये भारतीय-न्याय-संहितायाः प्रभावि क्रियान्वयनार्थं राज्य-आरक्षि-बलस्य अविश्रान्त-प्रचेष्टाः श्लाघिताः, तदीयं कार्यम् च अभ्यनन्दितम् ।

सुभाषितम्

शुभं वाप्यशुभं कर्म फलकालमपेक्षते।
शरद्येव फलत्याशु शालिर्न सुरभौ क्वचित्॥

भावार्थः- शुभ या अशुभ कर्म का फल समय आने पर ही मिलता है। जैसे शालि धान शरद ऋतु में ही शीघ्र फलता है, वसंत में कभी नहीं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तापत्रे दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

झारखण्ड-उच्च-न्यायालयेन राज्य-सर्वकारस्य जेएसएससी सीजीएल-परीक्षा-निरसन निर्णयः निरस्तः



झारखण्ड-उच्च-न्यायालयेन झारखण्ड-कर्मचारी चयन-आयोगस्य संयुक्त-स्नातक-स्तरीय-परीक्षायाः तदाधारेण विहितानां नियुक्तीनां निरसन विषयकः राज्य-सर्वकारस्य निर्णयः निरस्तः । न्यायमूर्तिः दीपक रोशनः सफल अभ्यर्थिभिः उपस्थापितानां याचिकानां श्रवणानन्तरम् एतं निर्णयं समुदघोषयत्, येन परीक्षया चयनितानां नियुक्तानां च कृते महती समाश्वासना प्राप्ता। राज्य-सर्वकारेण सीआईडी दलस्य अन्वेषण-प्रतिवेदनस्य अथ परीक्षार्थिनां प्रतिरोधानां च आधारं प्रदर्श्य षड्विंशत्यधिक द्विसहस्रतमवर्षस्य अगस्त-मासस्य अष्टादश दिनाङ्के परीक्षायाः नियुक्तये निरसन-सम्बद्धः आदेशः निस्सारितः। उच्च न्यायालयेन स्पष्टीकृतं यत् परीक्षायां कथित-अनियमितताना‌म् अन्वेषणं यथापूर्व प्रवर्तिष्यते, किन्तु कथितानां दुराचाराणाम् आधारेण सर्वे चयनिताः अभ्यर्थिनः सामूहिकरूपेण दोषिणः न परिगणयितुं शक्यन्ते। न्यायालयस्य अनेन निर्णयेन सह परीक्षायाम् उत्तीर्णाः प्रायः द्वात्रिंशदधिक-नवशतोत्तरैकसहस्रं अभ्यर्थिनः स्वकीय-राजकीय-पदानि रक्षितुं प्रभविष्यन्ति ।

केन्द्रीय-मन्त्रिणा डॉ. जितेन्द्र सिंहेन राष्ट्रव्यापी-अङ्कीय-जीवन-प्रमाणपत्र-अभियानस्य पञ्च-दशांश-शून्यस्य सूत्रपातः अकारि



डा. जितेन्द्रसिंहः नवदेहल्यां समस्ते राष्ट्रे 'डिजिटल-जीवन-प्रमाणपत्र-अभियानस्य पञ्चमं संस्करणम्' आरब्धवान् । असौ इदम् अभियानं ज्येष्ठ-नागरिकानां जीवन-सुगमतायाः महत्त्वपूर्णं पदं प्रोवाच्। प्रधानमन्त्रिणः 'विकसित भारत' इत्यस्य संकल्पं स्मरन् सः अवोचत् यत् राष्ट्रनिर्माणेषु वरिष्ठ-जनानाम् अपि विशिष्टं योगदानम् अस्ति । इयं योजना वृद्ध-पेन्शन-भोगिनां जीवन-प्रमाणपत्र-प्रदान-वेलायां बैंक-सरकारी-कार्यालय-गमनागमन-जनितात् क्लेशात् विमुक्तिं विधातुम् उद्दिश्यते।

सौर-ऊर्जा-नवीकरणीय ऊर्जा-क्षेत्रयोः रुआण्डादेशेन सह द्विपक्षीय-सहकारस्य सुदृढ़ीकरणाय भारतं तत्परम् - प्रह्लाद जोशी



नवीनकरण ऊर्जामन्त्री प्रह्लाद जोशी नवदेहल्यां समायोजितायाः 'अन्ताराष्ट्रिय-सौर-सङ्घस्य' नवम-महासभायाः अन्तराले रुवाण्डा-गणराज्यस्य सुसंरचना-राज्यमन्त्रिणा अरमन्द-ज़िङ्गिरो-इत्यमुना सह फलवतीं मन्त्रणाम् अकरोत् । अस्मिन् सुरम्ये अवसरे श्रीमान् जोशी सोत्साहं व्यजिज्ञपत् यत् सौर-ऊर्जा-क्षेत्रे भारत-रुवाण्डयोः पारस्परिकां सुदृढ-मैत्रीं विधातुं भारतं सुतरां तत्परम् अस्ति। सामाजिक सञ्चार-पटले लिखन् मन्त्री व्यज्ञापयत् यत् अस्मिन् सम्भाषणे 'ऑफ-ग्रिड' सौर-ऊर्जायाः उत्पादक-प्रयोगेषु विशेषतः सौर-क्षेत्रीय-सेचने, शीतलागारेषु, कृषि-सम्पदां संस्करणे च गाढं ध्यानं केन्द्रीकृतम् सः भृशं प्रावोचत् । इयं सहभागिता रुवाण्डा-देशस्य प्रजानां कल्याणाय प्रभावकारि-परिणामेषु परिणमेत इति धिया भारतदेशः तेन सह स्कन्धेन स्कन्धं योजयित्वा कार्यं करोति।

ऋतु-विज्ञान-विभागेन तटीय-आन्ध्रप्रदेशे, केरले, तमिलनाडु-राज्ये च आगामि-दिनद्वयार्थं धारासम्पात-वृष्टेः सञ्चेतना प्रकाशिता



भारतीय-ऋतुविज्ञानविभागेन उद्घोषितं यद् आगामिनो दिवसद्वये तटीय-आन्ध्रप्रदेशे, केरले, माहे, तमिळनाडुराज्ये, पुदुच्चेर्यां तथा कराइकाले प्रचुरवृष्टिः सम्भविष्यति। आन्ध्रप्रदेशे, ओडिशा-राज्ये, तमिळनाडुदेशे, पुदुच्चेर्यां कराइकाले च प्रचण्ड-निर्घोष-वातैः संवलिताः वज्रपाताः समुत्पद्येरन् तथैव तटीयकर्नाटकस्य, केरलस्य, माहे-क्षेत्रस्य, लक्षद्वीपस्य दक्षिण-आन्तरिककर्नाटकस्य च जनपदेषु एतादृश्य एव वायुमण्डलीय स्थितयः अस्ति। राजधानी-क्षेत्रे वायुमण्डलीय गुणवत्ता अद्यापि 'अतिदुष्टा' इत्येव श्रेणीं भजते। केन्द्रीय प्रदूषण-नियन्त्रण-परिषदः निर्देशानुसारं देहल्याः वायुगुणवत्ता-सूचकाङ्कः नवाष्ट्युत्तरत्रिशतमिताङ्कैः अङ्कितः ।

सेमीकॉन इण्डिया द्वि-दशांश-शून्यम् इति अन्तर्जाल अनुप्रयोग-पटलस्य विधिवत शुभारम्भं अकरोत् - अश्विनी वैष्णवः



केन्द्रीय-इलैक्ट्रॉनिक्स सूचना प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः नवदेहल्याम् एकस्मिन कार्यक्रमे सेमीकॉन इण्डिया द्वि-दशांश-शून्यम् इति अन्तर्जाल अनुप्रयोग-पटलस्य विधिवत शुभारम्भं अकरोत् । तत्र समागतं जनसमूहं सम्बोधयन् श्रीवैष्णवः प्रत्यपादयत् यत् गतेषु दशसु वर्षेषु देशस्य इलैक्ट्रॉनिक्स-उद्योगे सञ्जातं युगान्तकारी रूपान्तरणं सर्वकारस्य उद्योग-जगतश्च सामूहिक-प्रयासानां साफल्यं प्रदर्शयति। मन्त्रिणा संसूचितं यत देशेन अद्यापि स्व-चरम लक्ष्यं न सम्प्राप्तम्, अपितु इदानीन्तनं साफल्यं तु केवलम् आरम्भमात्रं वर्तते, एतत् इलैक्ट्रॉनिक्स उद्योगस्य प्रवर्धनाय अथ आत्मनिर्भर-भारतस्य निर्माणाय सुदृढां पीठिकां शिलान्यासं च विदधाति । आलोचनानां सद्भावेऽपि देशः मौनभावेन स्व-कार्ये संलग्नः आसीत् इति निर्दिशन् सः अवोचत् यत् भारतेन पदानुक्रम नीतिम् अनुसृत्य निर्मित-उत्पादेभ्यः आरभ्य मॉड्युल घटक-अपरिष्कृत-सामग्री-पर्यन्तं स्वावलम्बनस्य यात्रा सफलीकृता ।

अंशविपणिः

धनत्रयोदश्यां भारतीयांशविपण्यां दीपावल्याः इव कान्तिः समागता

मुंबई ,६ नवम्बर २०२६,
हिमसंस्कृतवार्ताः- डॉ विमलेश झा

धनत्रयोदश्याः पावनावसरे भारतीयांशविपण्यां उत्साहस्य, उल्लासस्य, सकारात्मकतायाश्च अद्भुतः समन्वयः दृष्टः। शुक्रवासरे, २०२६ तमस्य वर्षस्य नवम्बरमासस्य षष्ठे दिनाङ्के, भारतीयांशविपणी प्रारम्भिकावनतेः अनन्तरं सशक्तं प्रत्यागमनं कृत्वा महतीं वृद्धिं प्राप्तवती। विपण्याम् अभूतपूर्वा इयं वृद्धिः निवेशकानां मध्ये नवीनम् उत्साहं सञ्चारितवती। दीपावलीपर्वणः धनत्रयोदश्याश्च उल्लासपूर्णे वातावरणे अंशविपण्याः एषा प्रगतिः आर्थिकसमृद्धेः निवेशकविश्वासस्य च प्रतीकरूपेण प्रकटिता। बम्बईशेयरविपण्याः सेन्सेक्ससूचकाङ्कः प्रारम्भिकदौर्बल्यं परित्यज्य प्रायः १७१८.०१ अङ्कानां महतीं वृद्धिं प्राप्य ८१०२८.०२इति स्तरं प्राप्तवान्। विपण्याम् आगता एषा तीव्रवृद्धिः निवेशकानाम् आकर्षणस्य केन्द्रम् अभवत् तथा च भारतीयांशविपण्याः सामर्थ्यं पुनः प्रकाशयत्। राष्ट्रीयशेयरविपण्याः प्रमुखः सूचकाङ्कः निफ्टी-५० अपि तीव्रवेगेन वर्धमानः पुनः ४९३.७५ अंकानां वृद्धिं प्राप्य २५०३० .३५इति महत्त्वपूर्णां स्थितिं प्राप्तवान्। निफ्टीसूचकाङ्कस्य एषा वृद्धिः विपण्याः व्यापकां सकारात्मकतां प्रदर्शितवती। व्यवसायस्य प्रारम्भः दुर्बलवैश्विकसङ्केतानां प्रभावेण अवनत्या सह अभवत्। प्रारम्भिकसत्रे निवेशकेषु सावधानतायाः वातावरणम् आसीत्। किन्तु यथा यथा व्यवसायः अग्रे वर्धितः, तथा तथा विपण्यां क्रयणोत्साहः अपि वर्धितः। प्रमुखेषु अंशेषु क्रयणस्य वृद्ध्या सेन्सेक्सः निफ्टी च तीव्रगत्या प्रत्यागत्य हरितचिह्ने स्थितवन्तौ। भारतीयपरम्परायां धनत्रयोदशी धनस्य, वैभवस्य, समृद्धेः, शुभारम्भस्य च प्रतीकरूपेण मन्यते। अस्मिन् पावने अवसरे अंशविपण्याम् आगता महती वृद्धिः पर्वणः उल्लासं वर्धितवती। विपण्यां निवेशकानां सक्रियता, क्रयणप्रवृत्तेः वृद्धिः, प्रमुखसूचकाङ्कानां सुदृढता च सकारात्मकं व्यवसायवातावरणं निर्मितवती। विपण्याः एषा वृद्धिः निवेशकानां विश्वासेन तथा भारतीयार्थव्यवस्थायाः भाविसम्भावनाभिः सह सम्बद्धा दृश्यते। तथापि वैश्विकार्थिकपरिस्थितीनां, विदेशीनिवेशकानां गतिविधीनां, विभिन्न संयन्त्राणां वित्तीयपरिणामानां च प्रभावः विपण्याः भाविदिशायां निरन्तरं भविष्यति। एतयोः सूचकाङ्कयोः सुदृढता निवेशकानाम् उत्साहं वर्धयितुं शक्नोति। तथापि अशविपण्यां निवेशं कुर्वद्भिः विवेकः, धैर्यं, जोखिमप्रबन्धनं च प्राथमिकतया स्वीकर्तव्यम्।

विशेषतः अल्पकालिकव्यवसायं कुर्वन्तः निवेशकाः विपण्याः उतार-चढावेषु सावधानाः भवेयुः। समुचितविश्लेषणं विना निवेशसम्बद्धनिर्णयाः न करणीयाः। धनत्रयोदश्याः पावनावसरे भारतीयांशविपण्याम् आगता महती वृद्धिः दीपावल्याः उल्लासं आर्थिकजगति अपि साकारं कृतवती। प्रारम्भिकावनतेः अनन्तरं सेन्सेक्सस्य निफ्टीसूचकाङ्कस्य च सशक्तं प्रत्यागमनं विपण्याः सकारात्मकप्रवृत्तिं प्रदर्शयति।निवेशकेभ्यः अयं दिवसः आशायाः, विश्वासस्य, आर्थिकसम्भावनानां च सन्देशं दत्तवान्।धनत्रयोदश्याःशुभता, दीपावल्याः ज्योतिश्च भारतीयांशविपण्याः एतां कान्तिं आर्थिकसमृद्धेः निवेशकविश्वासस्य च मनोहरं चित्रं प्रस्तुतयतः।

हिमाचलस्य महत्तमो विजयः, ५५ कोटि-मिलियन-मात्राकं विद्युतः प्रदास्यति बीबीएमबी, प्रतिवर्षं १००० कोटिरूप्यकाणाम् आयः



हिमसंस्कृतवार्ता — चम्बा। स्वकीयाधिकाराय युध्यमानाय हिमाचलप्रदेशाय अपरा महती सफलता लब्धा। 'भाखड़ा-ब्यास-प्रबन्धन-मण्डलस्य' (BBMB) अवशिष्टराशेः (एरियर्) पञ्चदशवर्षपुरातने विवादे हिमाचलस्य पक्षे सर्वोच्चन्यायालयस्य निर्णयः समागतः। निर्णयस्यानुसारं हिमाचलाय ५५ कोटि-मिलियन-मात्राकं विद्युतः उपलप्स्यन्ते, या विंशतिः वर्षेषु 'बीबीएमबी'-संस्थया हिमाचलाय समर्पणीया भविष्यति। चम्बा-मण्डलस्य मैहला-क्षेत्रे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः इदं प्राकट्यम् अकरोत्। मुख्यमन्त्री प्रावोचत् यत् यदि षड्रूप्यकाणि (₹६) प्रति-मात्राकस्य दरेणापि विद्युद्विक्रयणं क्रियेत, तर्हि सर्वकाराय प्रतिवर्षं ५०० कोटिरूप्यकाणां राजस्वम् उपलप्स्यते। मुख्यमन्त्रिणा निगदितं यद् राजस्थानस्य रीत्या यदि अन्यैः प्रदेशैः सहापि १५.५० रूप्यकाणि प्रति-मात्राकस्य दरेण विद्युत्क्रयणसन्धिः सम्पद्येत, तर्हि हिमाचलसर्वकाराय प्रतिवर्षं प्रायः १००० कोटिरूप्यकाणां राजस्वं लप्स्यते।

सः अवदत् यद् यदि मतिः शुद्धा (नियत नेक), इच्छाशक्तिः दृढा, निष्ठा च स्यात्, तर्हि महती अपि सङ्ग्रामयात्रा जेतुं शक्यते। हिमाचलप्रदेशस्य वर्तमानसर्वकारेण स्वकीयाधिकारस्य अयं चतुर्थः सङ्ग्रामः चतुर्वर्षीये कार्यकाले युद्ध्वा जितः। 'वाइल्ड फ्लावर हॉल', जेएसडब्ल्यू (JSW), किशाऊ-जलबन्ध-प्रकरणेषु सर्वकारः इतः पूर्वमेव स्वकीयहितानां सङ्ग्रामं कृत्वा विजयं प्राप्तवान् अस्ति। मुख्यमन्त्री अकथयत् यद् अहम् अस्याः सफलतायाः कृते मन्त्रिमण्डलस्य सर्वान् सदस्यान्, अधिकारिणः, सर्वोच्चन्यायालये 'बीबीएमबी'-प्रकरणस्य पक्षं समर्थयतः सर्वान् अधिवक्तॄन् च हार्दिकं धन्यवादं ज्ञापयामि।

मुख्यमन्त्री सुक्खू-महोदयः बीबीएमबी-प्रकरणे भाजपा-दलं तीक्ष्णतया आक्षिप्तवान्। सः अवदत् यद् 'द्वियन्त्र-सर्वकारेण' (डबल-इञ्जन्-सर्वकारेण) हिमाचलप्रदेशस्य अधिकाराणां कृते सङ्ग्रामः किमर्थं न विहितः? भाजपा हिमाचलस्य हितानां रक्षणे संवर्धने च निष्फला जाता। ये स्वहितानां रक्षणं कर्तुं न शक्नुवन्ति, ते प्रदेशहितस्य युद्धं जेतुं न पारयन्ति। अस्माभिः यः कोऽपि सङ्ग्रामः लब्धः, सः जितः। वयं वैयक्तिकं न, अपि तु हिमाचलस्य हितानां सङ्ग्रामं कृतवन्तः; किन्तु भाजपा हिमाचलस्य हितानि उपेक्ष्य केवलं विधायकानां चौर्ये संलग्ना आसीत्।

सङ्ग्रामः अद्यापि न समाप्तः

मुख्यमन्त्रिणा प्रतिपादितं यद् अस्माकं सङ्ग्रामः अद्यापि न समाप्तः। साम्प्रतं 'जलकरस्य' (Water Cess) चण्डीगढ-नगरे च हिमाचलस्य अधिकाराणां सङ्ग्रामस्य विजयः अवशिष्टः वर्तते। 'आरडीजी' (राजस्व-न्यूनता-अनुदानस्य) स्थगनस्य अतीत्यापि मम पूर्णः विश्वासः अस्ति यद् हिमाचलप्रदेशः २०३२ तमे वर्षे भारतस्य सर्वाधिकं धनिकः समृद्धशाली च प्रदेशः भविष्यति। मुख्यमन्त्री अवदत् यथा यथा वयं प्रदेशस्य अधिकाराणां सङ्ग्रामं जयन्तः स्मः, तथा तथा प्रदेशवासिभ्यः तेषाम् अधिकाराः प्रदीयन्ते। सर्वकारः मार्ग-, शिक्षा-, स्वास्थ्य-, ग्रामीणार्थव्यवस्था-प्रभृतिषु क्षेत्रेषु नूतनाः विविधाः योजनाः आनयन् अस्ति।

उत्सवर्तौ स्वजनानाम् आनयनाय एचआरटीसी-प्रबन्धनस्य १३४ विशिष्ट-लोकयानानि बसयानानि नियोजितानि

हिमसंस्कृतवार्ताः- शिमला।

दीपावल्याः उत्सवावसरे शतशः जनान् स्वगृहाणि प्रापयितुं हिमाचल-पथ-परिवहन-निगमस्य १३४ विशिष्ट-लोकयानानि (स्पेशल-बसयानानि) बाह्यराज्यानि प्रति प्रस्थितानि। देहलीतः हिमाचलस्य पृथक्-पृथक्-क्षेत्रेभ्यः शुक्रवासरे ४२ लोकयानानि, चण्डीगढतः ६९ तथा बद्दी-क्षेत्रतः २९ यानानि प्रदेशस्य विविधमार्गेषु प्रस्थितानि सन्ति। अपरत्र राज्यस्य विविध-आगारेभ्यः (डिपो- केन्द्रेभ्यः) १३२ लोकयानानि देहलीं, चण्डीगढं, बद्दीक्षेत्रं च प्रति प्रेषितानि, यानि च ७ नवम्बरदिनाङ्के प्रदेशवासिनः गृहीत्वा प्रतिनिवर्तिष्यन्ते।

७ नवम्बरदिनाङ्के देहलीतः ४९ लोकयानानि, चण्डीगढतः ६३, बद्दीक्षेत्रतः २० अतिरिक्त-लोकयानानि प्रललिष्यन्ति। एचआरटीसी-संस्थायाः यानसंचारसेवा दीपावलीदिनेऽपि सायं पञ्चवादनं यावत् निरन्तरा स्थास्यति। ८ नवम्बर दिनाङ्के सायं पञ्चवादनात् ९ नवम्बर दिनाङ्कस्य प्रातः अष्टवादनं यावत् एचआरटीसी-संस्थायाः लोकयानसेवा स्थगिता (विरामिता) भविष्यति। अयं निर्णयः अत एव स्वीकृतः येन निगमस्य चालकाः परिचालकाश्च अपि स्वपरिवारैः सह दीपावलीपर्व आचरितुं शक्नुयुः। दीपावल्याम् अतिरिक्त- लोकयानानां सञ्चालनं देहली-चण्डीगढ- बद्दी- स्थानकेभ्यः भविष्यति। एकस्मिन् याने सम्पूर्णीभूते सति द्वितीयं यानं फलके (काउण्टर स्थले) सज्जीभविष्यति। एवं प्रकारेण प्रातःकालतः सायंकालं यावत् विविधानि यानानि पूर्णावस्थां प्राप्य स्वगन्तव्यानि प्रति प्रस्थापयिष्यन्ते। उपमुख्यमन्त्री परिवहनमन्त्री च मुकेश अग्निहोत्रीमहोदयः प्रावोचत् यत् दीपावल्यां जनानां गृहगमने काऽपि असुविधा न भवेत्, एतदर्थम् एचआरटीसी-संस्थया विशिष्टलोकयानानां प्रबन्धः कृतः। निगमः यात्रिभ्यः सुरक्षितां सौकर्यपूर्णां च परिवहनव्यवस्थां प्रदातुं प्रयतते।

दीपावलीं विलोक्य २६६ अतिरिक्त-लोकयानानां सञ्चालनस्य निर्णयः

परिवहननिगम-प्रबन्धनेन दीपावलीपर्व अवधाय देहली- चण्डीगढ- बद्दीस्थानेभ्यः प्रदेशस्य विविधानि क्षेत्राणि प्रति २६६ अतिरिक्तलोकयानानां सञ्चालनस्य निर्णयः गृहीतः। एतेषां यानानां माध्यमेन बाह्यराज्येषु प्रदेशस्य च औद्योगिकक्षेत्रेषु वृत्तिं, व्यवसायम्, अन्यानि कार्याणि च कुर्वन्तः जनाः दीपावल्याः उत्सवाय स्वगृहाणि प्राप्तुं शक्ष्यन्ति।

८ नवम्बर-दिनाङ्के सायं पञ्चवादनात् लोकयानसेवा स्थगिता स्थास्यति

एचआरटीसी-संस्थया इयं सुविधा दीपावल्यां प्रदेशवासिनां सुलभ-गृहप्रत्यागमनाय प्रारब्धा।

नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः शीघ्रमेव भारत-भ्रमणाय आगमिष्यति; नवदेहल्याः यात्रा निश्चिता



काष्ठमण्डपम् (काठमाण्डू) / नवदेहली:

नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः शीघ्रमेव भारतस्य औपचारिकभ्रमणाय नवदेहलीम् आगमिष्यति। अस्याः यात्रायाः तिथयः अपि निर्धारिताः सन्ति। प्रधानमन्त्री शाहः अस्मिन्नेव मासे नवदेहलीं सम्प्राप्स्यति। प्रधानमन्त्रिणः बालेन्द्रशाहस्य इयं यात्रा बहुभिः दृष्ट्या विशिष्टा वर्तते। अस्याः यात्रायाः प्राक् सः स्वकीयप्रोटोकॉल-नियमान् शिथिलीकृत्य भारतस्य विदेशसचिवेन सह मेलनम् अकरोत्। अस्य सन्दर्भस्य अपरं वैशिष्ट्यम् इदं यत् सः स्वस्य प्रथमाय विदेशभ्रमणाय चीनदेशम् अपहाय भारतदेशाय प्राथमिकतां दत्तवान्। प्रधानमन्त्री बालेन्द्रशाहः आगामिनः नवम्बरमासस्य द्वाविंशति (२२) दिनाङ्कात् भारतस्य त्रिदिवसीयायाम् आधिकारिकयात्रायां भविष्यति।

अस्याः यात्रायाः पूर्वसिद्धतारूपेण सः गुरुवासरे भारतस्य विदेशसचिवेन विक्रममिस्रीमहोदयेन सह साक्षात्कृत्य द्विपक्षीयसम्बन्धानां सुदृढीकरणविषये विचारविमर्शम् अकरोत्।

मूल्यवृद्धिः अप्रभाविता; धनत्रयोदश्यां हिमाचले सार्धैकसहस्रकोटिरूप्यकाणां व्यापारः



हिमसंस्कृतवार्ता,शिमला। धनत्रयोदश्याः अवसरे हिमाचलप्रदेशस्य विपणिषु शुक्रवासरे महती शोभा आसीत्, मूल्यवृद्धेः काले अपि ग्राहकाः दिनभरं प्रचुरं क्रयणम् अकुर्वन्। व्यापारिकसङ्घटनानाम् अनुसारम् अस्मिन् वारे हिमाचलप्रदेशे धनत्रयोदश्यां प्रायः १५०० कोटिरूप्यकाणां व्यापारः अभवत्। स्वर्ण-रजतयोः सहैव पात्राणां, वैद्युतोपकरणानां, वाहनानां च विक्रये अपि उल्लेखनीया वृद्धिः अङ्किता। शिमला, मण्डी, सोलन, काङ्गड़ा, ऊना, हमीरपुर, बिलासपुरसदृशेषु प्रमुखजनपदेषु विपणयः प्रभातात् निशीथपर्यन्तं जनाकीर्णाः आसन्। ग्राहकेषु उत्साहः एतादृशः आसीत् यत् बहुषु आपणेषु वस्तुक्रयणाय दीर्घाः पङ्क्तयः संजाताः। आभूषणालयेषु, पात्रभाण्डारेषु, वैद्युतोपकरणप्रदर्शनालयेषु च दिनभरं क्रयणक्रमः प्राचलत्। वणिजाम् अनुसारम् अस्मिन् वारे जनानां क्रयणक्षमता संवर्धिता, वस्तु-सेवा-करस्य (GST) न्यूनतया च उपभोक्तारः प्रत्यक्षं लाभम् अलभन्त। स्वर्ण-रजतपात्राणां, पाकशालासामग्रीणां, केषाञ्चन वैद्युतोपकरणानां च मूल्येषु ह्रासेन क्रयणे अधिकः वेगः दृष्टः। व्यापारसङ्घटनानां कथनम् अस्ति यत् करदरेषु एषा विश्रान्तिः विपणौ नवीनाम् ऊर्जां सञ्चारितवती।

धनत्रयोदश्याम् अस्मिन् वारे प्रायः ४०० नूतनानां वाहनानां विक्रयः अपि अभवत्। वाहनविक्रेतारः अकथयन् यत् अस्मिन् वारे द्विचक्रिकाणां चतुश्चक्रिकाणां च वाहनानां विक्रये प्रायः त्रिंशत्-प्रतिशतं यावत् वृद्धिः जाता। व्यापारमण्डलानां मतम् अस्ति यत् असौ उत्सवावसरः प्रदेशस्य अर्थव्यवस्थायाः कृते नवीनां गतिं दत्तवान्। स्वर्ण-रजतयोः सह पात्राणां वैद्युतोपकरणानां च दृढविक्रयेण विपणिषु उत्साहस्य वातावरणं निर्मितम्।व्यापारमण्डलस्य प्रदेशाध्यक्षः सोमेशकुमारशर्मा अकथयत् यत् धनत्रयोदश्यां प्रदेशे प्रायः १५०० कोटिरूप्यकाणां व्यापारः संजातः। वस्तु-सेवा-करदरेषु न्यूनतया उपभोक्तृणां विश्वासः संवर्धितः। जनाः मुक्तहस्तेन क्रयणं कुर्वन्ति, येन विपणिषु बहुकालानन्तरम् एतादृशी शोभा दृश्यते। धनत्रयोदशी अस्मिन् वारे व्यापाराय नवीनाम् उड्डीयमानताम् अयच्छत्। व्यापारमण्डलस्य प्रदेशाध्यक्षः सोमेशकुमारशर्मा धनत्रयोदश्याः दीपोत्सवपर्यन्तं प्रदेशे पञ्चसहस्रकोटिरूप्यकाणां व्यापारस्य अनुमानम् अकरोत्।अपरत्र, देशे शुक्रवासरे धनत्रयोदश्याः अवसरे एकलक्षकोटिरूप्यकेभ्यः अधिकस्य व्यापारः पञ्जीकृतः। अस्मिन् केवलं स्वर्ण-रजतयोः विक्रयः ६०,००० कोटिरूप्यकेभ्यः अधिकः भवेत् इति अनुमानम् अस्ति। एषा सूचना 'कॉन्फेडरेशन ऑफ ऑल इण्डिया ट्रेडर्स' (CAIT) इत्यनया संस्थया दत्ता। संस्थया उक्तं यत् उत्सवकाले क्रयणं प्रति ग्राहकाणाम् उत्साहः यथावत् वर्तते, तैः धनत्रयोदशीसम्बद्धानि पारम्परिकवस्तूनि सोत्साहं क्रीतानि।एतस्मिन् अन्तरे, 'ऑल इण्डिया ज्वैलर्स एण्ड गोल्डस्मिथ फेडरेशन' (AIJGF) इत्यनेन उक्तं यत् स्वर्ण-रजतयोः उच्चमूल्येषु सत्सु अपि अनयोः याचना (माङ्गः) दृढा वर्तते। क्रेतारः अधुना लघुभारयुक्त-आभूषणानां पारम्परिक-निवेश-उत्पादानां च अधिकं चयनं कुर्वन्ति।

स्वदेशीप्रौद्योगिक्या निर्मितः

निमज्जकपोतविरोधी (पनडुब्बी-रोधी) युद्धपोतः 'अमिनी' नौसेनायां सम्मिलितः

नवदेहली / कोलकाता:स्वदेशीप्रौद्योगिक्या निर्मितः निमज्जकपोतविरोधी युद्धपोतः 'अमिनी' भारतीयनौसेनायाः पोतव्यूहे विधिवत् सम्मिलितः जातः। अनेन नौसेनायाः जले अन्तर्निहितानां सङ्कटानाम् अन्वेषणक्षमतायां तेषां निवारणे च महती वृद्धिः भविष्यति। नौसेनया शुक्रवासरे विज्ञापितं यत् 'अमिनी' इत्यस्य निर्माणे अशीतिप्रतिशतं (८०%) स्वदेशीसामग्र्याः उपयोगः कृतः अस्ति तथा च अस्य निर्माणम् अभिकल्पनं (डिजाइन) च कोलकातास्थया 'गार्डन रीच शिपबिल्डर्स एण्ड इंजीनियर्स' (GRSE) संस्थया कृतम्। जलस्यान्तरे निगूढानां निमज्जकपोतानाम् (पनडुब्बियों का) अभिज्ञानार्थं विनाशार्थं च अयम् उन्नतयुद्धपोतः लघुभारयुक्त-टोर्पिडो-अस्त्रैः, स्वदेशी-रॉकेट्-प्रक्षेपकाभ्यासेन, प्रगत-सोनारप्रणाल्या च सज्जः अस्ति। जलप्रवाहवेगेन (Water-jet propulsion) सञ्चालितेषु भारतीयनौसेनायाः बृहत्तमेषु युद्धपोतेषु अस्य गणना भवति। अनेन नौसेनायाः निमज्जकपोतविरोधिकार्येषु, तटीयनिरन्तर-निरीक्षणे, समुद्रे विस्फोटकसुरङ्गस्थापने (Mine laying) च सामर्थ्यं सुदृढं भविष्यति।अस्य युद्धपोतस्य नामकरणं लक्षद्वीपस्य 'अमिनी' इति द्वीपस्य आधारेण कृतम्। अयं पूर्वं नौसेनायां सेवितस्य 'आईएनएस अमिनी' इत्यस्य नूतनावतारः अस्ति। पूर्वतनः 'आईएनएस अमिनी' इत्याख्यः 'पेट्या-३' श्रेण्याः युद्धपोतः आसीत्, यः २००२ तमे वर्षे सेवामुक्तः कृतः। अस्य नूतनयुद्धपोतस्य नौसेनायै समर्पणं देशस्य आत्मनिर्भर-युद्धपोतनिर्माणक्षेत्रे एका महती उपलब्धिः वर्तते।



अयोध्यायां त्रिंशल्लक्षदीपैः रचिष्यते नूतनः कीर्तिमानः; एकविंशतिशतं (२१००) द्रोणविमानानि प्रदर्शयिष्यन्ति रामायणम्; ज्ञायताम् कीदृश्यः सन्ति सज्जाः?



अयोध्या पुनः एकवारम् आस्थायाः, भक्तेः, भव्यतायाः च विशालतमस्य उत्सवस्य साक्षिणी भवितुं सज्जते। दीपोत्सवस्य दशमसंस्करणम् ऐतिहासिकं विधातुं रामनगर्यां सज्जाः अन्तिमचरणे सन्ति। अस्मिन् वारे 'राम की पैड़ी' इत्याख्यं स्थानं विहाय सरयूनद्याः षट्पञ्चाशत्सु (५६) घट्टेषु त्रिंशल्लक्षाधिकानि (३०,००,०००+) दीपानि प्रज्वालयिष्यन्ते। तथैव, एकपञ्चाशदधिकैकशतं सहस्रद्वयं (२१५१) वेदाचार्याः पूजकाः च युगपत् सरयूतटे महाआरतीं करिष्यन्ति। दीपोत्सव-२०२६ इत्यस्य मुख्यातिथयः भारतस्य उपराष्ट्रपतयः सी. पी. राधाकृष्णन्-महोदयाः भविष्यन्ति। कार्यक्रमे मुख्यमन्त्रिणः योगी-आदित्यनाथ-महोदयाः अपि उपस्थास्यन्ति।अस्मिन् वारे दीपोत्सवे परम्परायाः आधुनिकप्रविधेः च अनुपमः सङ्गमः द्रक्ष्यते। आकाशे एकविंशतिशतं (२१००) स्वदेशीयानि द्रोणविमानानि रामायणस्य प्रमुखप्रसङ्गान् सजीवान् करिष्यन्ति। एतेषु वीरमुद्रायां प्रभुश्रीरामः, लक्ष्मणः, हनुमान्, रावणवधः, पुष्पकविमानं, रामदरबारः चेति रूपाणि प्रदर्शितानि भविष्यन्ति। एतदतिरिच्य महर्षेः वाल्मीकेः, गोस्वामिनः तुलसीदासस्य, तथा च हनूमतः विविधानि रूपाणि अपि आकाशे उत्कीर्णितानि भविष्यन्ति।दीपोत्सवस्य सज्जासु एका विशिष्टा वार्ता गङ्गा-यमुनातहजीबस्य (सामञ्जस्यपूर्णसंस्कृतेः) अपि वर्तते। रामायणस्य प्रसङ्गानाम् आधारेण दृश्यझाङ्कीनां (शोभायात्रायाः चित्राणां) निर्माणे मुसल्मानकर्मकाराः अपि स्वकीयां भूमिकां निर्वहन्ति।

एलपीजी वितरणशुल्कवृद्धिः पारदर्शिता च अद्यापि अनिर्णीता!



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः,

देशे एलपीजी गैस-वितरकाणां वितरणशुल्कवृद्धेः याञ्चा अद्यापि पूर्णः न अभवत्। वर्तमानकाले प्रतिपिण्डं प्रायः ₹३४ (जीएसटी सहितम्) शुल्कं प्राप्यते। अस्मिन् एव शुल्के वाहनव्ययः, श्रमिकाणां पारिश्रमिकं, अनिलकोशस्य गृहपर्यन्तं वितरणं, रिक्त- अनिलकोशस्य प्रत्यागमनं च अन्तर्भवति।

ओटीपी, डीएसी, ऑनलाइन आरक्षणं, सर्वरसम्बद्धाः समस्याः वितरणकर्मचारिणां कार्यं कठिनं कुर्वन्ति। तथापि सर्वं दायित्वं वितरकाणां कर्मचारिणां च उपरि अस्ति। एलडीएआई- सङ्घटनस्य आन्दोलनानन्तरम् अपि वितरणशुल्कवृद्धेः विषये ठोसः निर्णयः न जातः। एफएलडीआई-महासचिवः पवन सोनी, एआईएलडीएफ- अध्यक्षः चन्द्रप्रकाश यादवः, एआईएचपीडीए-सङ्घटनस्य कैलाश दुदानी, एआईबीडीए- सङ्घटनस्य पी. एन. सेठः, एलडीएआई- अध्यक्षः बी. एस. शर्मा च एकत्र आगत्य समस्यायाः समाधानं कुर्युः इति अपेक्षा अस्ति। देशस्य प्रायः २६,००० एलपीजी वितरकाः उचितवितरणशुल्कवृद्धिं पारदर्शितां च इच्छन्ति। अधुना प्रश्नः अस्ति यत् वितरणकर्मचारिणां श्रमस्य, सुरक्षायाः तथा वास्तविकव्ययस्य मूल्याङ्कनं कदा भविष्यति?

उत्तरप्रदेश- पुलिससेवायां ४५४३ उपनिरीक्षकाणां प्लाटून-कमाण्डराणां च नियुक्तिः। मुख्यमन्त्रिणः योगी आदित्य-नाथस्य नेतृत्वे पारदर्शी -नियुक्तिप्रक्रियायाः प्रशंसनीयः उपक्रमः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः।

उत्तरप्रदेशस्य मुख्यमन्त्रिणः माननीयस्य श्रीयोगी आदित्यनाथस्य नेतृत्वे उत्तरप्रदेश-पुलिसविभागे योग्यताधारितया पारदर्शिन्या च नियुक्तिप्रक्रियया चयनितेभ्यः युवभ्यः नियुक्तिपत्राणि प्रदत्तानि। अयं सर्वथा प्रशंसनीयः उपक्रमः अस्ति। अनेन योग्याः अभ्यर्थिनः कस्यापि अनुशंसां विना स्वयोग्यतया सेवायाः अवसरं प्राप्तवन्तः। एतेन युवकेषु शासनव्यवस्थायाः प्रति विश्वासः सुदृढः अभवत्। अस्मिन् अवसरे चयनितेभ्यः ४५४३ उपनिरीक्षकेभ्यः (सब-इन्स्पेक्टर) प्लाटून- कमाण्डरेभ्यः च हार्दिक्यः शुभकामनाः। योगीमहोदयस्य सर्वकारस्य एषः प्रयासः प्रदेशस्य कानूनव्यवस्थां अधिकं सुदृढां कर्तुं महत्त्वपूर्णः सिद्धः भविष्यति। सर्वेभ्यः नवनियुक्तेभ्यः सहकर्मिभ्यः कर्तव्यपालने सफलतायाः, सेवायां समर्पणस्य उज्ज्वलभविष्यस्य च हार्दिक्यः शुभकामनाः। योग्यतायाः सम्मानः, युवशक्तेः सशक्तीकरणम्, सुरक्षितउत्तरप्रदेशस्य निर्माणम्!

अशासकीय- सहायताप्राप्त- माध्यमिक- विद्यालयेषु नवनियुक्तशिक्षकाणां वेतनभुक्तेः निर्देशः

दीपावलीपर्वणः पूर्वं वेतनभुक्तिं सुनिश्चितं कर्तुं शिक्षानिदेशकस्य आदेशः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, प्रयागराजम्। उत्तरप्रदेशस्य माध्यमिकशिक्षा-निदेशकः प्रतापसिंह बघेलः अशासकीय-सहायताप्राप्त- माध्यमिक- विद्यालयेषु नवनियुक्तानां एलटी-ग्रेड-शिक्षकाणां, प्रवक्तृणां, प्रधानाध्यापकानां, प्रधानाचार्याणां वेतन-भुक्तेःविषये महत्त्वपूर्णान् निर्देशान् निर्गतवान्। उत्तरप्रदेश- शिक्षासेवा- चयनायोगेन चयनिताः अभ्यर्थिनः विभिन्नेषु विद्यालयेषु नियुक्ताः कृताः सन्ति। एतेषां नवनियुक्तशिक्षकाणां शैक्षणिकाभिलेखानां सत्यापनस्य दायित्वं समस्तेषु जनपदेषु जिला-विद्यालय-निरीक्षकेभ्यः (DIOS) प्रदत्तम् अस्ति। अभिलेखानां सत्यापनप्रक्रियायां किञ्चित् समयः अपेक्षितः भवितुम् अर्हति। परन्तु समीपस्थं दीपावलीपर्व दृष्ट्वा नवनियुक्तशिक्षकाणां वेतनभुगतानं पर्वणः पूर्वमेव करणीयम् इति निर्देशः प्रदत्तः। यदि कस्यचित् नवनियुक्तशिक्षकस्य नियमितवेतन-भुक्तिं प्रारब्धं नास्ति, तर्हि तस्मात् शपथपत्रं प्राप्य दीपावलीपर्वणः पूर्वं वेतनभुगतानं सुनिश्चितं कर्तुं सर्वेभ्यः जिला-विद्यालय-निरीक्षकेभ्यः निर्देशितम् अस्ति।



शैक्षणिकाभिलेखानां सत्यापनानन्तरं यदि किमपि अनियमितता अथवा विसङ्गतिः प्राप्यते, तर्हि विधिसम्मतकार्यवाही तथा प्राथमिकी पञ्जीकरणं कृत्वा नियुक्तिः प्रारम्भादेव शून्या इति मन्यमाना राजकोषीयक्षतेः प्रतिपूर्तिः अपि सुनिश्चितीकरिष्यते। अस्य आदेशस्य प्रतिलिपिः माध्यमिक- शिक्षाविभागस्य वरिष्ठाधिकारिभ्यः, मण्डलीय- संयुक्तशिक्षानिदेशकेभ्यः च आवश्यक- कार्यवाहीहेतोः प्रेषिता अस्ति। दीपावलीपर्वणः पूर्वं नवनियुक्तशिक्षकाणां वेतनभुक्तेःस्य निर्देशेन शिक्षकेषु प्रसन्नतायाः वातावरणं भविष्यति।

जन्म-मृत्यु प्रमाणपत्र निर्माणस्य नियमेषु परिवर्तनम्



१ अक्तूबर २०२६ तः नूतना प्रक्रिया प्रवर्तते इति अधिसूचनायां कथितम्

हिमसंकृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदेहली। भारतसर्वकारस्य गृह मन्त्रालयस्य पञ्जीकरण एवं नागरिकविभागस्य जन्म-मृत्यु-पञ्जीकरण- सम्बद्धायाम् अधिसूचनायां जन्म-मृत्युप्रमाणपत्र- निर्माणस्य प्रक्रियायां विलम्बस्य आधारेण नूतना वर्गीकरणव्यवस्था निर्दिष्टा अस्ति। चित्रे प्रदर्शितायाम् अधिसूचनायां एषा व्यवस्था २०२६ तमस्य वर्षस्य अक्तूबरमासस्य प्रथमदिनाङ्कात् प्रवर्तते इति उल्लिखितम् अस्ति। अधिसूचनानुसारं जन्म-मृत्योः पञ्जीकरणस्य विलम्बकालस्य आधारेण पञ्च वर्गाः निर्धारिताः सन्ति।

१. शून्यतः २१ दिनपर्यन्तम्- सामान्यप्रक्रियया पञ्जीकरणं भविष्यति। अत्र विलम्बशुल्कं न देयम्। चिकित्सालयस्य पर्चिका तथा माता-पित्रोः आधारपत्रं आवश्यकं भविष्यति।

२. २१ दिनतः ३० दिनपर्यन्तम्- विलम्बशुल्केन सह पञ्जीकरणं भविष्यति। स्थानीय-पञ्जीकरणाधिकारी एतत् कार्यं करिष्यति।

३. ३० दिनतः एकवर्षपर्यन्तम्- लिखितानुमत्या पञ्जीकरणं भविष्यति। आवेदनपत्रं, विलम्बस्य कारणं, शुल्कं, शपथपत्रं च आवश्यकं भविष्यति।

४. एकवर्षतः द्विवर्षपर्यन्तम्- जिलाधिकारी अथवा उपजिलाधिकारी अथवा तेन अधिकृतः कार्यपालकदण्डाधिकारी आदेशेन पञ्जीकरणं करिष्यति। अस्मिन् वर्गे जिलाधिकारिणः लिखितादेशः, आवश्यकप्रमाणपत्राणि, सत्यापनं तथा निर्धारितशुल्कं अपेक्षितम् अस्ति।

५. द्विवर्षात् अधिके विलम्बे- न्यायालयस्य आदेशेन एव जन्म-मृत्योः पञ्जीकरणं भविष्यति। प्रथमश्रेणी- न्यायिकदण्डाधिकारी न्यायालयस्य आदेशः आवश्यकः भविष्यति। जन्म-मृत्योः प्रमाणं, न्यायालये याचिका तथा द्वयोः साक्षिणोः माध्यमेन आदेशप्राप्तिः अपेक्षिता भविष्यति।

विशेषरूपेण स्मरणीयम्-

अधिसूचनायां निर्दिष्टानुसारम् २०२६ तमस्य वर्षस्य सितम्बरमासस्य ३० दिनाङ्कपर्यन्तं पुरातननियमानुसारं जिलाधिकारीस्तरे कार्यं भविष्यति। अक्तूबर-मासस्य प्रथमदिनाङ्कात् द्विवर्षाधिक- पुरातनप्रकरणेषु न्यायालयस्य आदेशः आवश्यकः भविष्यति इति कथितम् अस्ति। सम्बद्धाः सर्वे स्थानीय- पञ्जीकरण-अधिकारिणः, जिला- पञ्जीकरणाधिकारिणः, अन्ये अधिकृताधिकारिणः च एतेषां नियमानां पालनं कुर्युः इति अधिसूचनायां निर्देशः प्रदत्तः अस्ति।

विशेषसूचना- एषः समाचारः प्रदत्तचित्रे दृश्यमानायाः अधिसूचनायाः आधारेण संस्कृतेन प्रस्तुतः अस्ति। अधिसूचनायाः आधिकारिक-प्रामाणिकता सम्बन्धितस्य सर्वकारस्य आधिकारिक- स्रोततः सत्यापनीया।

जनगणना-२०२७ इत्यस्य सज्जतासमीक्षायै उपवेशनम् आयोजितम्। स्वगणनायाः सुविधा

नवम्बरमासस्य १६ दिनाङ्कात् ३० दिनाङ्कपर्यन्तम्। कलेक्ट्रेट सभागारे मुख्यविकासाधिकारिणा अधिकारिभिः सह कृता समीक्षा।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, ०६ नवम्बर २०२६। जनगणना-२०२७ इत्यस्य द्वितीयचरणस्य (जनसंख्यागणनायाः) सफलसम्पादनार्थं नवम्बरमासस्य षष्ठे दिनाङ्के कलेक्ट्रेट सभागारे मुख्यविकासाधिकारिणा सर्वैः चार्ज-अधिकारिभिः अन्यैः सम्बन्धितैः अधिकारिभिः सह समीक्षा-सभा आयोजिता। सभायां जनगणनायाः सज्जतायाः समीक्षा कृता। मुख्यविकासाधिकारिणा सर्वेभ्यः चार्ज- अधिकारिभ्यः निर्देशः प्रदत्तः यत् ते गणकानां (प्रगणकानां) पर्यवेक्षकाणां च सह समन्वयसभां कृत्वा सर्वाः आवश्यकाः सज्जताः समयेन सम्पादयेयुः।

जनसामान्यस्य सुविधायै नवम्बरमासस्य षोडशदिनाङ्कात् त्रिंशद्दिनाङ्कपर्यन्तं स्वगणनायाः (Self Enumeration) व्यवस्था कृता अस्ति। नागरिकाः https://se.census.gov.in इति जालपुटे स्वपरिवारस्य विवरणं स्वयमेव ऑनलाइन माध्यमेन पञ्जीकर्तुं शक्नुवन्ति। स्वगणनां सम्पूर्णां कृत्वा प्राप्तां SE ID सङ्ख्यां सुरक्षितां स्थापयन्तु तथा च गृहम् आगच्छन्तं गणकं प्रति अवश्यं प्रदर्शयन्तु। ततः दिसम्बरमासस्य प्रथमदिनाङ्कात् जनवरीमासस्य चतुर्थदिनाङ्कपर्यन्तं गणकाः गृहे गृहे गत्वा निर्धारितैः चत्वारिंशत् प्रश्नैः जनसंख्यागणनां करिष्यन्ति। अतः सर्वेभ्यः जनपदवासिभ्यः अनुरोधः क्रियते यत् ते अस्मिन् महत्त्वपूर्णे राष्ट्रियकार्ये सक्रियतया सहभागिनः भवन्तु, सम्यक् पूर्णं च विवरणं प्रददतु तथा गणकेभ्यः पूर्णं सहयोगं कुर्वन्तु। भवतः सहभागितैव सटीकजनगणनायाः, भविष्ये उत्तमविकासयोजनानां निर्माणस्य आधारः भविष्यति।

क्षयरोगस्य अन्तः, नियमित-चिकित्सया एव! क्षयरोगस्य (टीबी) विरुद्धे युद्धे प्रमादः न, अपि तु नियमितता आवश्यकी

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, उत्तरप्रदेशः क्षयरोगस्य लक्षणानि समये एव ज्ञात्वा शीघ्रं चिकित्सकीयपरीक्षणं कारयन्तु। चिकित्सकस्य परामर्शानुसारं नियमितरूपेण औषधानि सेवन्तु तथा सम्पूर्णं उपचारक्रमं समापयन्तु। उपचारस्य मध्ये औषधसेवनं कदापि न त्यजन्तु। नियमित- चिकित्सया क्षयरोगः पूर्णतया निवारयितुं शक्यते।

सम्पूर्णः उपचारः- क्षयरोगस्य प्रभावी प्रहारः। क्षयरोगमुक्तभारतस्य निर्माणं कुर्मः। स्वस्थभारतं, क्षयरोगमुक्तभारतं च!

चिकित्साधिकारिभ्यः महती समाश्वासना स्नातकोत्तरानन्तरं वर्षद्वयं प्रदेशे देया भविष्यति सेवा, ४० लक्षरूप्यकाणां दातव्यं भविष्यति प्रतिज्ञापत्रम्



हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशसर्वकारेण वैद्यानां स्नातकोत्तर-तथा-अतिविशेषज्ञता-नीतौ (PG/Super Specialty Policy) संशोधनं विधाय 'कार्यप्रशिक्षु-चिकित्साधिकारिभ्यः' (जॉब-ट्रेनी-मेडिकल-ऑफिसरेभ्यः) महती समाश्वासना प्रदत्ता। अधुना नियमित-सामान्य-कर्तव्य-अधिकारिरूपेण (नियमित-GDO रूपेण) नियोजनाय नियुक्तिप्रक्रियायां सम्मिलिताः संविदाधारिताः (अनुबन्धयुक्ताः) वैद्याः कार्यप्रशिक्षु-चिकित्साधिकारिणश्च स्नातकोत्तर-पाठ्यक्रमस्य अध्ययनाय नीतेः लाभं प्राप्तुं शक्ष्यन्ति। संशोधनानुसारम् एतेभ्यः स्नातकोत्तर-चिकित्साशास्त्रे स्नातकोत्तर-दन्तचिकित्साशास्त्रे च त्रयस्त्रिंशत्-दशमलव-त्रयस्त्रिंशत्-प्रतिशत (३३.३३%) परिमितस्य आरक्षण-वर्गस्य लाभग्रहणायानुमतिः प्रदत्ता। स्वास्थ्यविभागेन निर्गतायाम् अधिसूचनायाम् अयं व्यत्ययः कृतः। संशोधितप्रावधानानाम् अनुसारेण संविदाधारिताः ते वैद्याः, येषां नियुक्तिः कार्मिकविभागस्य समये-समये निर्गतानां नियमानाम् अन्तर्गततया सञ्जाता, कार्यप्रशिक्षु-चिकित्साधिकारिणश्च पीजी-नीतेः अन्तर्गततया प्रदेशस्य सर्वकारीय-चिकित्सा-दन्तचिकित्सा-महाविद्यालयेषु उच्चशिक्षां प्राप्तुं पारयिष्यन्ति। तथापि स्नातकोत्तर-पाठ्यक्रमस्य अवधौ कार्यप्रशिक्षु-चिकित्साधिकारिभ्यः केवलं तदेव छात्रवृत्ति-वेतनं (स्टाइपेण्ड्) लप्स्यते, यत् साक्षात्-भर्ती-प्रत्याशिभ्यः देयं वर्तते।

स्नातकोत्तरपाठ्यक्रमे चयनिताः कार्यप्रशिक्षु-चिकित्साधिकारिणः प्रदेशसर्वकारेण सह वर्षद्वयस्य प्रतिज्ञापत्रं (बन्धपत्रं/बॉण्ड) पूरयिष्यन्ति। अस्मिन् स्नातकोत्तरशिक्षानन्तरम् एकवर्षस्य अनिवार्य-क्षेत्रीय-पदस्थापनम् (अनिवार्य-फील्ड-पोस्टिङ्ग) अपि समाविष्टं भविष्यति। अस्य बन्धपत्रस्य राशिः चत्वारिंशल्लक्षरूप्यकाणि (₹४० लक्षम्) निर्धारिता। अर्थात् स्नातकोत्तरपदवीप्राप्त्यनन्तरं सम्बद्धेन वैद्येन प्रदेशे निर्धारितावधिं यावत् सेवाः समर्पणीयाः भविष्यन्ति। अधिसूचनायाम् इदमपि स्पष्टीकृतं यत् स्नातकोत्तरपदवीसमाप्तेः अनन्तरं वैद्येन कार्यप्रशिक्षुरूपेण अवशिष्टा सेवावधिः अपि समापनीया भविष्यति। कार्यप्रशिक्षु-अवधेः सम्पूर्णावस्थायाः अनन्तरमेव स्नातकोत्तर-पाठ्यक्रमार्थं निर्धारितस्य बन्धपत्रस्य अवधिः प्रारप्स्यते। अनेन स्नातकोत्तरशिक्षां कुर्वद्भिः कार्यप्रशिक्षु-वैद्यैः पूर्वं स्वकीया अवशिष्टा कार्यप्रशिक्षु-सेवा समापनीया भविष्यति। संशोधितनीतौ स्पष्टं कृतं यत् संविदाधारिताः सामान्यकर्तव्याधिकारिणः कार्यप्रशिक्षुवैद्याश्च सर्वकारस्य समये-समये अधिसूचितनीत्यनुसारेण नियमिताः कर्तुं शक्ष्यन्ते। एतदतिरिच्य राज्यसर्वकारस्य निर्णयानुसारं हिमाचलप्रदेश-लोकसेवा-आयोगस्य माध्यमेन उत अन्यनिर्धारित-नियुक्तिप्रक्रियाभिः अपि नियुक्तयः विधातुं शक्यन्ते।



रविः खरिडेहालः - बेङ्गलूरु। "गुरुवासरे ओडिशा तटस्य समीपे क्षेपणास्त्रपरीक्षणं भूतम्।" गुरुवासरे भारतदेशः प्रलयनामक ईषत्-प्रक्षेपणास्त्रं परीक्षण-प्रहारं कृतवान् । परीक्षणं सफलम् अभवत् । इदं क्षेपणास्त्रं पारम्परिक प्रक्षेप्याग्रं वहितुं समर्थम् अस्ति । ए-पि-जे-अब्दुल्कलाम-द्वीपात् परीक्षणम् अभवत् । अस्य क्षेपणास्त्रस्य विकासः डी-आर-डी-ओ इत्यनेन कृतः यस्य उपयुक्तभारः क्षमता ५००-१००० किलोग्रामः आसीत् । इदं लघुदूरस्थं भूतलात् भूतलम् अस्त्रम् अस्ति । एतेन सफलपरीक्षायाः सह क्षेपणास्त्रस्य प्रेरणार्थम् उत्पादनम् आसन्नम् अस्ति । तस्य बहुमुखीत्वं धारं प्रदाति।

केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन (सीबीएसई) २०२७ वर्षस्य दशमी-द्वादशी-कक्षयोः परीक्षा-समयसारिणी प्रख्यापिता; फेब्रुवरी-मासस्य १६ दिनाङ्कात् आरप्स्यन्ते परीक्षाः

नवदेहली:केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन (सीबीएसई) २०२७ वर्षस्य दशम्याः द्वादश्याः च कक्षायाः बोर्ड-परीक्षाणां समयसारिणी सार्वजनिकीकृता। उभयोः कक्षयोः परीक्षाः आगामिवर्षे फेब्रुवरी-मासस्य षोडशे (१६) दिनाङ्के प्रारप्स्यन्ते। प्रतिदिनं परीक्षा प्रातः सार्ध-दशवादने (१०:३०) आरप्स्यते। दशम्याः परीक्षाः मार्च-मासस्य ९ दिनाङ्के, तथा च द्वादश्याः परीक्षाः एप्रिल-मासस्य ९ दिनाङ्के समाप्ताः भविष्यन्ति। मण्डलस्य सूचनानुसारं दशमी-कक्षायाः परीक्षाः त्र्यशीतिषु (८३) विषयेषु, द्वादशी-कक्षायाः च परीक्षाः एकविंशत्यधिकैकशतं (१२१) विषयेषु आयोजयिष्यन्ते। परीक्षा-समयसारिण्याः निर्माणकाले चत्वारिंशत्-सहस्राधिकविषय-संयोजनानि (Subject Combinations) ध्याने स्थापितानि, येन कस्यापि छात्रस्य विषयद्वयस्य परीक्षा एकस्मिन्नेव दिने न आपतेत्।

धन्वन्तरि-जयन्त्याः पावनावसरे मुख्यवक्त्र्या डॉ. सुमनराण्या भारतीय-ज्ञानपरम्परायां संस्कृतभाषायाः साहित्यस्य च गौरववैभवविषये विशिष्टव्याख्यानम्



महेन्द्रगढम्, ६ नवम्बर २०२६। धन्वन्तरि-जयन्त्याः पावनावसरे भारतीयज्ञानपरम्परायाः संरक्षण-संवर्धनार्थं संस्कृतभाषायाः साहित्यस्य च गौरवपूर्णपरम्परायाः प्रचार-प्रसारार्थं तापडियावैश्विकसंस्कृतसेवा इति संस्थया अन्तर्जालमाध्यमेन विशिष्टव्याख्यानकार्यक्रमस्य सफलतया आयोजनं कृतम्। अस्मिन् विशिष्टव्याख्यानकार्यक्रमे स्वामिदयानन्दसरस्वती-पीठस्य पीठाध्यक्षा तथा संस्कृतविभागस्य सहायकाचार्या, हरियाणा-केन्द्रीय-विश्वविद्यालयस्य, डॉ. सुमन रानी मुख्यवक्त्रीरूपेण उपस्थिता । तया भारतीयज्ञानपरम्परां, गौरवशालिनीं संस्कृतभाषां एवं साहित्यञ्चावलम्ब्य अत्यन्तं सारगर्भितं ज्ञानवर्धकं प्रेरणादायकं च व्याख्यानं प्रस्तुतम्।स्वव्याख्याने डॉ. सुमनराण्या उक्तं यत् संस्कृतभाषा न केवलं संवादस्य माध्यमम् अपितु सा भारतीयसंस्कृतेः, ज्ञान-विज्ञानस्य, दर्शनस्य, साहित्यस्य तथा मानवीयमूल्यानां च अमूल्यनिधिरप्यस्ति। भारतीयज्ञानपरम्परायां निहितानि शाश्वतजीवनमूल्यानि सम्प्रति अपि मानवसमाजस्य मार्गदर्शनं कर्तुं समर्थानि सन्ति।धन्वन्तरि-जयन्त्याः सन्दर्भे तया प्रतिपादितं यत् भारतीयसंस्कृतौ आरोग्यं केवलं शारीरिकस्वास्थ्यपर्यन्तं सीमितं नास्ति, अपितु शरीरस्य, मनसः, बुद्धेः तथा आत्मनः सम्यक् सन्तुलनं स्वस्थजीवनस्य मूलाधारः अस्ति। आयुर्वेदस्य तथा भारतीयज्ञानपरम्परायां मूलभावना “सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः” इति लोककल्याणस्य भावनया ओतप्रोता अस्ति।कार्यक्रमस्य अध्यक्षपदमलंकुर्वाणा जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य, जयपुरस्य कुलगुरुः प्रो. मदनमोहनझामहोदयः स्वकीयम् आशीर्वचनं प्रदत्तवान्। तेन भारतीयज्ञानपरम्परायाः वैश्विकमहत्त्वं संस्कृतभाषायाः च सार्वकालिकप्रासङ्गिकता सम्यक् रूपेण प्रतिपादिता।कार्यक्रमस्य संयोजनं तापडियाआचार्यसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. हेमन्त कुमारशर्ममहोदयः अकरोत्। सः स्वाध्यक्षीयोद्बोधने संस्कृतभाषायाः प्रचार-प्रसाराय तथा भारतीयज्ञानपरम्परायाः संरक्षणाय एतादृशानां विद्वत्कार्यक्रमाणाम् अत्यन्तमहत्त्वम् इति रेखांकितम् अकरोत्।

अस्मिन् कार्यक्रमे प्रो. राकेशकुमार तेहरा, प्रो. पुष्पलता शास्त्री, प्रो. हरभजनकुमारशर्मा, प्रो. जगदीशशर्मा, प्रो. शिवरामशर्मा, प्रो. तेजपालशर्मा, डॉ. महेन्द्रकुमारः उपाध्यायप्रभृतयः आयोजनसमित्याः सम्माननीयाः सदस्याः सहयोगं कृतवन्तः।अन्तर्जालमाध्यमेन आयोजिते अस्मिन् विशिष्टव्याख्याने अनेके विद्वांसः, शोधार्थिनः छात्राश्च उत्साहेन सहभागितां कृतवन्तः। सर्वैः वक्तृभिः भारतीयज्ञानपरम्परायां संस्कृतवाङ्मयस्य च शाश्वतज्ञानम् अस्माकं युववर्गे सम्प्रेषयितुं विशेषप्रयत्नाः करणीयाः इति विचारः प्रकटितः।अन्ते तापडियावैश्विकसंस्कृतसेवा संस्थया आयोजितः अयं विशिष्टव्याख्यानकार्यक्रमः धन्वन्तरि-जयन्त्याः अवसरं ज्ञानसंवर्धनस्य भारतीयसंस्कृतेः संरक्षणस्य संस्कृतभाषायाः प्रचार-प्रसारस्य च पर्वरूपेण परिवर्तितम्। कार्यक्रमस्य समापनं शान्तिमन्त्राणां सुमधुरगानेन सञ्जातमिति।

मथुराजनपदस्य भारतकुमारस्य दिल्लीविश्वविद्यालये संस्कृते सर्वोच्चस्थानप्राप्तिः,त्रिसुवर्णपदकेभ्यः चयनम्





(वार्ताहरः वत्सदेशराजशर्मा)मथुरामण्डलम्। जनपदमथुरायाः बरकाग्रामनिवासिना भारतकुमारेण स्वप्रतिभायाः, अध्यवसायस्य, कठोरपरिश्रमस्य च बलेन दिल्लीविश्वविद्यालये संस्कृतविषयस्य स्नातकोत्तरपाठ्यक्रमे सर्वोच्चस्थानं लब्ध्वा स्वजनपदस्य क्षेत्रस्य च गौरवं संवर्धितम्। दिल्लीविश्वविद्यालयेन प्रकाशितायां वर्ष २०२६ तमस्य पदकानां पुरस्काराणां च अनन्तिमायां योग्यतासूच्यां तस्य चयनं त्रिसुवर्णपदकेभ्यः अभवत्। अनेन अभूतपूर्वोपार्जनेन तस्य परिवारे, ग्रामे, समग्रे क्षेत्रे च परमानन्दस्य गौरवस्य च वातावरणं व्याप्तम् अस्ति।भारतकुमारः एकस्मात् साधारणात् मध्यमवर्गीयकृषकपरिवारात् सम्बद्धः अस्ति। तस्य पिता श्रीमान् देवीरामसिंहः कृषकः वर्तते, माता च दिवङ्गता श्रीमती इन्द्रवती देवी आसीत्। साधारणे ग्राम्यपरिवेशे संवर्धितस्य भारतकुमारस्य प्रारम्भादेव विद्यायां, संस्कृतभाषायां, साहित्ये, भारतीयज्ञानपरम्परायां च विशेषानुरागः आसीत्। सीमितेषु साधनेष्वपि निरन्तरमध्ययनं कठिनपरिश्रमं च सः स्वसफलतायाः आधारम् अकरोत्। सः स्वीयां प्रारम्भिकीं माध्यमिकीं च शिक्षां श्रीमद्दयानन्द-आर्ष-ज्योतिर्मठ-गुरुकुलात्, पौंधा, देहरादून (उत्तराखण्ड) इत्यस्मात् सम्प्राप्तवान्। तदनन्तरं सः उत्तराखण्डसंस्कृतविश्वविद्यालयात् शास्त्री-उपाधिम्, कुरुक्षेत्रविश्वविद्यालयाच्च शिक्षाशास्त्रिणः (बी.एड.) उपाधिं प्राप्तवान्। गुरुकुलवासकाले सः गुरुकुलस्य प्रतिनिधित्वं कुर्वन् विविधासु राज्यस्तरीयासु अखिलभारतीय-शास्त्रस्पर्धासु भागं गृहीत्वा उत्कृष्टाणि स्थानानि अर्जितवान्। अस्मिन्नेव वर्षे भारतकुमारेण दिल्लीविश्वविद्यालयात् संस्कृतविषये स्नातकोत्तर-परीक्षा (एम.ए.) ९.०३३ सीजीपीए-अङ्कैः सह प्रथमश्रेण्याम् उत्तीर्णा। स्वकीयेनोत्कृष्ट-शैक्षणिकप्रदर्शनेन सः विश्वविद्यालये सर्वोच्च-स्थानमलभत। अस्याः एव उपलब्धेः फलस्वरूपं दिल्लीविश्वविद्यालयस्य वर्ष २०२६ तमस्य अनन्तिमयोग्यतासूच्यां तस्मै त्रीणि स्वर्णपदकानि उद्घोषितानि। भारतकुमारस्य विशेषरुचिः संस्कृतसाहित्यस्य अध्ययने अध्यापने, काव्यपाठने, भारतीयज्ञानपरम्परायाः अनुशीलने च वर्तते। सः संस्कृतभाषासाहित्ययोः प्रचारे प्रसारे च तथा च प्राचीनभारतीयज्ञानविज्ञानस्य समृद्धपरम्परायाः संरक्षणे दृढप्रतिज्ञः अस्ति। तस्य जीवनलक्ष्यं शिक्षाध्यापनक्षेत्रे योगदानं दत्त्वा संस्कृतभाषायाः गरिमां महत्त्वं च जनसामान्यं यावत् प्रापयितुम् अस्ति।सामान्यकृषकपरिवारात् समुत्थाय देशस्य प्रतिष्ठिते केन्द्रीयविश्वविद्यालये दिल्लीविश्वविद्यालये संस्कृते सर्वोच्चस्थानप्राप्तिः भारतकुमारस्य परिश्रमस्य, निष्ठायाः, अनुशासनस्य, शैक्षणिकसमर्पणस्य च परिचायिका वर्तते। तस्येयम् उपलब्धिः न केवलं तस्य परिवारस्य ग्रामस्य च, अपितु समग्रस्य मथुराजनपदस्य कृतेऽपि परमगौरवस्य विषयः अस्ति।अस्यां महत्याम् उपलब्धौ वैदिकगणः इत्यस्याः संस्थायाः संस्थापकाध्यक्षेण वत्सदेशराजशर्मणा स्वसंस्थापक्षतः भारतकुमाराय हार्दाः शुभाशयाः समर्पिताः, तस्य समुज्ज्वलभविष्याय च मङ्गलकामनाः प्रकटिताः। तस्य सफलता क्षेत्रस्य अन्यान् छात्रान् यूनश्च विद्याक्षेत्रे अग्रेसराः भवितुं प्रेरयिष्यति। जयतु संस्कृतम्! जयतु भारतम्!

धनतेरसि संस्कृतविश्वविद्यालयस्य स्वास्थ्यकेन्द्रे धन्वन्तरिपूजनम्



हिमसंस्कृतवार्ताः- वाराणसी, ६ नवम्बर। धनतेरसः पावनावसरे सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य स्वास्थ्यकेन्द्रे आयुर्वेदस्य आराध्यदेवस्य भगवान् धन्वन्तरेः विधिविधानपूर्वकं पूजनार्चनं सम्पन्नम्। छात्रकल्याणसङ्कायप्रमुखः प्रो. शैलेशकुमारमिश्रः वैदिकपारम्परिकविधिना पूजां सम्पाद्य विश्वविद्यालयपरिवारस्य सहितं सम्पूर्णविश्वस्य उत्तमस्वास्थ्यस्य, निरामयजीवनस्य, सुखसमृद्धेः लोककल्याणस्य च मङ्गलकामनां कृतवान्। अस्मिन्नवसरे प्रो. शैलेशकुमारमिश्रेण उक्तं यत् भगवान् धन्वन्तरिः भारतीयायुर्वेदपरम्परायाः प्रवर्तकः आराध्यदेवश्च अस्ति। धनतेरसः पर्व स्वास्थ्यं जीवनस्य अमूल्यसम्पत्तिरूपेण मानयितुं निरामयजीवनस्य प्रति च जागरूकतां धारयितुं सन्देशं ददाति। तेन स्वस्थजीवनाय योगस्य, आयुर्वेदस्य, संयमिताहारस्य प्राकृतिक-जीवनशैल्याश्च अनुसरणे बलं प्रदत्तम्।तेन उक्तं यत् भारतीयज्ञानपरम्परायां 'स्वस्थस्य स्वास्थ्यरक्षणम्, आतुरस्य विकारप्रशमनम्' इति भावनायाः विशेषं महत्त्वं प्रदत्तम् अस्ति। स्वास्थ्यं केवलं व्यक्तेः विषयः नास्ति, अपितु परिवारस्य, समाजस्य राष्ट्रस्य च समृद्धेः आधारः अस्ति। भगवान् धन्वन्तरेः आराधना आरोग्यस्य, सेवायाः, करुणायाः सर्वजनहिताय च भावनां सुदृढां करोति। पूजनार्चनं पूजारी डॉ. राजकुमारमिश्रेण सम्पन्नं कारितम्। अस्मिन्नवसरे सुनीलकुमारः, प्रदीपकुमार पाण्डेयः, सञ्जयकुमारतिवारी इत्यादयः विश्वविद्यालयपरिवारस्य अन्ये सदस्याश्च उपस्थिताः आसन्।

प्रकृत्या सह शिक्षन्ते बालकाः, पुष्पपत्रैः निर्मिताः आकर्षकाः कलाकृतयः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, कानपुरनगरम्। कानपुरनगरे स्थिते बंसठी प्रथम-प्राथमिक- विद्यालये राज्यपुरस्कारप्राप्तः शिक्षकः राजनलालः छात्रैः सह पुष्पैः पत्रैः च विविधाः आकर्षकाः कलाकृतयः निर्मापितवान्। अस्याः गतिविधेः माध्यमेन बालकानां बौद्धिकः, शारीरिकः, भावनात्मकः, सृजनात्मकः तथा सामाजिकः विकासः प्रोत्साहितः।

प्रकृत्या सह शिक्षणस्य अस्याः पहलस्य माध्यमेन बालकाः स्वकल्पनाशक्तिं सृजनात्मकप्रतिभां च प्रदर्शयितुं अवसरं प्राप्तवन्तः। उत्तरप्रदेशस्य बेसिकशिक्षाविभागः बालकानां कृते आनन्ददायकाम्, अनुभवात्मकाम्, गतिविधि-आधारितां च शिक्षां प्रदातुं निरन्तरं प्रयत्नशीलः अस्ति।

सद्विचारः (उत्तमविचाराः)

मानवजीवने सद्विचाराणां महत्त्वं सर्वोपरि वर्तते। यः मानवः शुभं चिन्तयति, तस्य जीवनं सुखमयं भवति। उक्तं च अस्ति – "यादृशी भावना यस्य, सिद्धिर्भवति तादृशी।" अर्थात् यादृशः अस्माकं विचारः, तादृशमेव अस्माकम् आचरणं भविष्यति।जीवने सदैव सत्यं वदेत्, धर्मस्य आचरणं कुर्यात् च। परोपकारः परमः धर्मः अस्ति; यः परेषाम् उपकारं करोति, सः एव ईश्वरस्य प्रियः भवति। क्रोधः, लोभः, मोहः च आत्मनः शत्रवः सन्ति। एतेषां त्यागेनैव मनसि शान्तिः उत्पद्यते।अस्माभिः कदापि कस्यापि अहितं न चिन्तनीयम्। यतो हि 'वसुधैव कुटुम्बकम्' इति अस्माकं सनातनः विचारः। यदा वयं सर्वेषां कल्याणां चिन्तयामः (सर्वे भवन्तु सुखिनः), तदा अस्माकं मनसि पवित्रता, समाजे च सौहार्दं वर्धते। अतः सदा उत्तमं चिन्तयेत्, उत्तमं वदेत्, उत्तमं च आचरेत्। एषः एव सफलाय जीवनाय मार्गः अस्ति।



एकदिवसीयशृङ्खलायाः द्वितीये द्वन्द्वे भारतं स्वस्य अग्रसरतां द्विगुणीकर्तुं प्रयतते; न्यूजीलैण्ड-दलस्य कृते प्रत्यावर्तनस्य कठिनम् आह्वानम्

हिमसंस्कृतवार्ता। वेलिङ्गटनम्: एकदिवसीय-क्रिकेट-शृङ्खलायां पूर्वमेव स्वकीयं प्रभुत्वं स्थापितवत् भारतदलं शनिवासरे आयोज्यमाने द्वितीये द्वन्द्वे विजयं सम्प्राप्य स्वस्य अग्रसरतां द्विगुणीकर्तुं प्रयतते। अपरत्र, आतिथेयं न्यूजीलैण्ड-दलं प्रत्यावर्तनस्य महता सङ्कल्पेन सह क्रीडाङ्गणम् अवतरिष्यति।शृङ्खलायां भारतस्य १-० इत्यनेन अग्रसरता निश्चितरूपेण दलस्य कृते समाश्वासदायिनी स्थितिः अस्ति। तथापि भारतीयदलम् एतत् जानाति यत् न्यूजीलैण्ड-दलं, विशेषतः स्वकीये गृहाङ्गणे, केवलम् एकां पराजयं प्राप्य दुर्बलं न मन्तव्यम्। आतिथेयदलाय वेलिङ्गटन-नगरस्य अयं स्पर्धात्मकः मुकाबलः वस्तुतः 'अन्तिम-मुकाबलात् पूर्वम् अन्तिमः' (फाइनल से पहले फाइनल) इव अस्ति। यदि ते अस्मिन् द्वितीये द्वन्द्वे अपि पराजिताः भवेयुः, तर्हि शृङ्खलायां प्रत्यावर्तनं तेषां कृते नितरां दुष्करं स्यात्।अस्मिन् द्वन्द्वे भारतीयदलस्य कृते महत्तमः सबलपक्षः तस्य अनुभवीनां फलकाकाराणां (बल्लेबाजों का) उत्कृष्टं रूपं तथा च कन्दुकक्षेपकाणां (गेंदबाजों का) सुदृढः आत्मविश्वासः वर्तते। प्रथमे द्वन्द्वे विराटकोह्लिनः चतुःसप्तति (७४) धावनाङ्कानाम् उत्कृष्टा क्रीडा पुनः एकवारं प्रामाणयत् यत् एकस्मै श्रेष्ठाय क्रीडकाय स्वयोग्यतायाः प्रमाणार्थं कस्यापि परिचयस्य आवश्यकता न भवति। परिस्थितीः अवबुध्य, समीचीनान् कन्दुकांश्चित्वा, आक्रमणात् पूर्वं धावनाङ्कपरिवर्तनस्य (स्ट्राइक रोटेट) तस्य कौशलं भारतस्य महती शक्तिः अस्ति।न्यूजीलैण्ड-दलस्य कृते आह्वानम् अधिकं गुरुतरं वर्तते। शिरसि आघातकारणात् (कनकशन-कारणात्) डेवोन-कॉन्वे-महोदयस्य दलात् बहिर्गमनं दलस्य कृते महती क्षतिः अस्ति, विशेषतः यदा दलस्य फलकावली स्थैर्येण युक्ता भवितुम् अपेक्षते। अधुना डेरिल-मिशेलेन, टॉम-लैथमेन, ग्लेन-फिलिप्स-महोदयेन च अधिकं दायित्वं वोढव्यम्। धावनाङ्कनिर्माणस्य समग्रं दायित्वं केवलम् एकद्वयोः क्रीडकयोः उपरि न निक्षेप्तुं शक्यते।दलाधिपेन मिशेल-सैण्टनरेण अपि स्वस्य कन्दुकक्षेपणव्यूहः समीचीनः करणीयः भविष्यति। मैट-हेनरी, काइल-जैमीसन इत्यनयोः भारतीयशीर्षक्रमं सङ्कटे पातयितुं सामर्थ्यं वर्तते, किन्तु तदर्थं प्रारम्भे एव 'विकेट' इत्यस्य ग्रहणम् अनिवार्यं भवेत्। कोह्लिसदृशानाम् अनुभवीनां फलकाकाराणां सम्मुखे केवलं समीचीनकन्दुकक्षेपणं पर्याप्तं नास्ति, अपि तु दीर्घकालं यावत् निरन्तरं दबावः अपि संस्थापनीयः भविष्यति।



॥ श्रीतुङ्गनाथनीराजनगीतम् ॥

[श्रीतुङ्गनाथ-केदार-कपाटपिधानावसरे (06.11.2026 ई.) प्रस्तुतम्]

रचयिता – अङ्कुरनागपालः

(शोधार्थी, वेदान्तवि., श्रीला.ब.शा.रा.सं.वि.वि.)

जय तुङ्गेश महेश्वर, जय गौरीशङ्कर ।
इन्द्रविष्णुविधिवन्दित, जय जय करुणाकर ॥१॥
ओं हर हर हर महादेव ॥
शूलहस्त गङ्गाधर, चन्द्रचूड स्वामिन् ।
गौर गौरिकावल्लभ, जय कपालमालिन् ॥२॥ ओं हर हर ...
अष्टविभव पञ्चानन, केदारेश विभो ।
रक्ष रक्ष नन्दीश्वर, भैरव साम्ब प्रभो ॥३॥ ओं हर हर ...
नगपतिशयन दिवाकर-शशिपावकलोचन ।
दापय सौख्यकुलं नः, संसृतिकुलमोचन ॥४॥ ओं हर हर ...
रघुपतिलङ्कापतिसत्-सेवितपादयुगम् ।
निशिपतिशापविनाशनम् अभिवन्देऽनुदिनम् ॥५॥ ओं हर हर
मार्कण्डेयवरप्रद, पाण्डवदृष्टभुज ।
विश्वसृष्टिसंहारक, वर्णाश्रमबीज ॥६॥ ओं हर हर ...
शङ्करदेशिकपूजित, तुङ्गाचलचारिन् ।
दैवतकुलसेवित, जय जटाजूटधारिन् ॥७॥ ओं हर हर ...
भूतनाथगणवीक्षित, शिक्षितसभ्यकुलम् ।
वेदसुरक्षणदीक्षित, वर्धय धर्मबलम् ॥८॥ ओं हर हर ...
सर्वसुखद कामेश्वर, नाशय दोषचयम् ।
पाहि पाहि त्रिपुरान्तक, कुरु नो वीतभयम् ॥९॥ ओं हर हर .
कुरुताज्जनकल्याणम्, शैवमन्त्रदानम् ।
अथ हर सज्जनसङ्कट-शोकमोहमानम् ॥१०॥ ओं हर हर ...
गौरीदयित मयि शम्भो, देहि कृपादृष्टिम् ।
त्वत्पादाम्बुजभक्ति-दानात्सुखवृष्टिम् ॥११॥ ओं हर हर ...
नागपालाङ्कुरेणेदं कृतं गीतं महेशितुः ।
नीराजनपरं पुण्यं तत्कृपावाञ्छया हृदा ॥



धन्वन्तरिजयन्त्यां आयुर्वेदस्य आधुनिकचिकित्सायाश्च समन्वये विमर्शः



लखनऊ। भगवान् धन्वन्तरेः जयन्त्यवसरे उत्तरप्रदेशसंस्कृतसंस्थानस्य लखनऊ-परिसरे शुक्रवासरे "आयुर्वेदस्य आधुनिक-चिकित्सायाश्च समन्वयेन समन्वितस्वास्थ्य-सेवानां सम्भावनाः" इति विषयमधिकृत्य व्याख्यानगोष्ठी आयोजिता। कार्यक्रमस्य उद्देश्यं आयुर्वेदस्य पारम्परिकज्ञानपरम्परायाः आधुनिकचिकित्साविज्ञानस्य उपलब्धीनां च समन्वयेन प्रभावीः जनोपयोगिन्यश्च स्वास्थ्यसेवानां सम्भावनानां विषये विमर्शः आसीत्। गोष्ठ्यां विशेषज्ञैः उक्तं यत् आयुर्वेदे निहितं ज्ञानम्, अनुभवः जीवनदृष्टिश्च आधुनिकवैज्ञानिकानुसन्धानस्य सह संयोज्य स्वास्थ्यसेवाः अधिकं प्रभाविकाः कर्तुं शक्यन्ते। वक्तृभिः पारम्परिकचिकित्सा-पद्धतीनां वैज्ञानिकपरीक्षणस्य,प्रमाणा-धारितानुसन्धानस्य तथा जनस्वास्थ्यस्य क्षेत्रे तासाम् उपयोगस्य च विषये अपि बलं प्रदत्तम्। मुख्यवक्तारौ डॉ. जे.एन. पाण्डेयः, राजकीय-आयुर्वेद-महाविद्यालयस्य लखनऊस्य पूर्वप्राध्यापकः, तथा डॉ. अवधेशद्विवेदी, आयुष्-विभागस्य उत्तरप्रदेशशासनस्य वरिष्ठ-चिकित्साधिकारी, आयुर्वेदस्य आधुनिक-चिकित्सायाश्च विभिन्नपक्षेषु स्वविचारान् प्रस्तुतवन्तौ। वक्तृभ्यां उक्तं यत् भारतस्य प्राचीना चिकित्सापरम्परा केवलं ऐतिहासिकी सांस्कृतिकश्च धरोहरः नास्ति, अपितु स्वास्थ्यसंरक्षणेन सन्तुलितजीवनशैल्या च सम्बद्धं महत्त्वपूर्णं ज्ञानमपि धारयति। तस्याः वैज्ञानिकाध्ययनस्य समकालीन-स्वास्थ्यावश्यकतानाम् अनुरूपं च उपयोगस्य आवश्यकता अस्ति।कार्यक्रमे चिकित्साक्षेत्रसम्बद्धैः विशेषज्ञैः आयुर्वेदस्य आधुनिकचिकित्सायाश्च मध्ये समन्वयस्य सम्भावनानां, अनुसन्धानस्य तथा जनस्वास्थ्यस्य विभिन्नपक्षाणां विषये विचाराः प्रस्तुताः। अस्मिन् अवसरे संस्थानस्य अधिकारिणः, कर्मचारिणः, संस्कृतविद्वांसः, शिक्षाविदः तथा चिकित्साक्षेत्रसम्बद्धाः विशेषज्ञाः उपस्थिताः आसन्।उत्तरप्रदेश-संस्कृतसंस्थानद्वारा संस्कृतभाषायाः भारतीय-ज्ञानपरम्परायाश्च संरक्षणस्य, संवर्धनस्य तथा जनसामान्यं प्रति तस्याः महत्त्वस्य प्रसारणस्य उद्देश्येन विभिन्नाः शैक्षिकाः, साहित्यिकाः बौद्धिकाश्च कार्यक्रमाः आयोज्यन्ते। धन्वन्तरिजयन्त्यवसरे आयोजिता इयं गोष्ठी अपि भारतीयज्ञानविज्ञानपरम्परां समकाली-नसन्दर्भैः सह संयोजयितुं कृतः एकः प्रयासः आसीत्।

गीतानिकेतन-आवासीय विद्यालये दीपोत्सवः



हिमसंस्कृतवार्ता। विद्यालयस्य प्रांगणे दीपावली-पर्व 'हरित-दीपावली' इत्येतस्य नाम्ना अत्यन्तम् उत्साहेन आचरितम्। कार्यक्रमस्य शुभारम्भः सरस्वतीवंदनायाः अभवत्। अनन्तरम् संगीत-आचार्या श्रीमती सविता महोदया भगवतः श्रीरामस्य स्तुतिम् वंदनाम् च कृतवती। एतत्पश्चात् विभाग-संयोजिका श्रीमती सवितामहोदया प्राचार्यमहोदयस्य स्वागतम् अभिनन्दनं च चकार।विद्यार्थिनः श्रीरामस्य, सीतायाः, लक्ष्मणस्य, हनुमतः च रूपम् धृत्वा सुन्दरम् अभिनयम् अकुर्वन्। कलाचार्यस्य श्री नितेशकुमारस्य निर्देशने सञ्चालिते अस्मिन् कार्यक्रमे प्राचार्यः श्री नारायणसिंहः भगवतः स्वरूपाणां मुकुटधारणं तिलकम् च कृत्वा राज्याभिषेकम् अकरोत्। सर्वे छात्राः हरित-दीपावली-सुरक्षित-दीपावली-प्रतिज्ञां प्राप्नुवन्।



वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य मया अतीव विचित्राः वार्ताः श्रुताः। प्रथमा वार्ता यन्त्रमानवानां विषये अस्ति। एकेन आपणिकेन आपणे यन्त्रमानवाः स्थापिताः, परन्तु तैः सम्यक् कार्यं न कृतम्। अतः प्रबन्धकैः ते कर्मणः निष्कासिताः।

नन्दिनी- अहो! यन्त्रमानवैः अपि कार्यं न कृतम्, महद् आश्चर्यम्। सर्वदा मानवाः एव श्रान्ताः भवन्ति इति मया चिन्तितम्। इदानीं द्वितीयां वार्तां शृणु। आस्ट्रेलिया-देशे एकेन इटालियीय-पाचकेन पिज्जा-भोजने अनानास-फलं न स्थापितम्। तत् तस्य संस्कृतेः अपमानः इति तेन उक्तम्। अतः सः पाचकः अपि कर्मणः निष्कासितः।

काव्या- हह! अनानास-फलं न स्थापितम् अतः पाचकस्य वृत्तिः नष्टा। एतत् अतीव हास्यजनकम्। तृतीया वार्ता तु अन्नाहार-विषये अस्ति। वैज्ञानिकैः नवदार्ववकरेण खादितुं योग्याः मधुरपिष्टकाः निर्मिताः। अन्तरिक्ष-यात्रिणां कृते एते भक्ष्याः वैज्ञानिकैः निर्मिताः इति मया पठितम्।

नन्दिनी- हा कष्टम्! नवदार्ववकरेण पिष्टकाः निर्मिताः इति श्रवणेन एव मम उदरपीडा जाता। केन एतत् भक्ष्यं खादितम्! अन्तिमां चतुर्थीं वार्ताम् अपि शृणु। राजस्थाने एकेन सङ्घेन "दुर्वार्ताव्यसनी" इति नूतना वृत्तिः प्रारब्धा। तस्यां वृत्तौ जनेन सम्पूर्णं दिनम् उपविश्य दूरभाषे केवलं चलचित्राणि दृश्यन्ते। तदर्थम् एव तस्मै पूर्णं वेतनं दत्तम्।

काव्या- अहो! तस्मिन् कार्ये केवलं चलचित्राणि दृश्यन्ते इति तु मम प्रियं कार्यम्! एताः सर्वाः वार्ताः अतीव विचित्राः सन्ति। एतासां रोचकवार्तानां चर्चां कर्तुं कृतज्ञताम् अर्पयामि तुभ्यम्।



" षड्भावविकाराः"

जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति इति षड्भावविकाराः भवन्ति ।

{१} जायते---यः क्रियाया प्रथम भावविकार वर्तते । अस्य भावः अस्ति उत्पन्नं भवति । यः भावः अस्तित्वस्य प्रतिषेधं करोति ।

{२} अस्ति--- इत्यस्य भाव शब्दोश्चोत्पनस्य सत्वस्यावधारणं तन्मात्रं ब्रवीति । "आत्म धारणानुकुलो व्यापारः" अस्ति शब्दस्य अर्थ अस्ति यः भावः न तु विपरिणामम् आचष्टे अपूर्णत्वात् । न तं प्रतिषेधयति उपस्थितत्वात् ।

{३} विपरिणमते--- इत्येष शब्द अपच्यमानस्य तत्वाद्भ्रश्यमानस्य विकारं विक्रियामात्रं ब्रवीति । न वृध्देरर्थमाचष्टे, अपूर्णत्वात् न च तां प्रतिषेधति उपस्थितत्वात् । अस्य अर्थ अस्ति 'परिवर्तन' ।

{४} वर्धते--- इत्येष शब्दः स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनामभ्युच्चयं ब्रवीति । अथवा हिरण्यधान्यादीनामभ्युच्चयं ब्रवीति । यथा वर्धते विजयेनेति वा वर्धते शरीरेणति वा । अत्र वर्धते इति ब्रुवाणो नापक्षयमाचष्टे, नापि तं प्रतिषेधयति ।

{५} अपक्षीयते--- तु तथैव, यथा स्वांगैः सांयोगिकैः वा द्रव्यैः उपचीयते । वृध्देः प्रतिलोम्यं तु अपक्षय एव भवति । तत्रापि नाचष्टेऽपरभावं न वा प्रतिषेधति । 'वर्धते'- इत्यस्य पदस्य सर्वथा विपरितः ज्ञेयः । उदा. अपक्षीयते शरीरेण ।

{६} विनश्यति--- इत्येषः शब्दः अपरभावस्यदिमाचष्टे न पूर्वभावमाचष्टे । तस्या च अवस्थायां विद्यमानपि पूर्वभावमपक्षीयतेरर्थं नाचष्टे न प्रतिषेधति । अस्यार्थेऽस्ति 'विनाशः' । अयं षड्भावविकारेषु अन्तिमः भावविकारः । यदा ह्रासः स्व अन्तिम सीमानम् आगच्छति तदा विनाशः प्रारभ्यते ।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

व्याकरणचिन्तनम् -०४

मतुप्-प्रत्ययुतानि विंशतिवाक्योदाहरणानि -

१. सः बुद्धिमान् बालकः अस्ति
२. मम पिता धनवान् नास्ति, किन्तु गुणवान् अस्ति।
३. श्रीमान् रामः अयोध्यायाः राजा आसीत्।
४. सा रूपवती कन्या अस्ति।
५. विद्यावान् पुरुषः सर्वत्र पूज्यते।
६. अस्माकं गुरुः ज्ञानवान् अस्ति।
७. बलवान् सिंहः वने वसति।
८. सा श्रीमती सीता पतिव्रता आसीत्।
९. भाग्यवान् जनः एव सुखं लभते।
१०. अयं छात्रः शीलवान् अस्ति।
११. धैर्यवान् सैनिकः युद्धे जयति।
१२. मम माता दयावती अस्ति।
१३. पुण्यवान् पुरुषः स्वर्गं गच्छति।
१४. भवान् क्रोधवान् न भवतु।
१५. शक्तिमान् हनुमान् समुद्रं लङ्घितवान्।
१६. बुद्धिमती बालिका परीक्षायाम् उत्तीर्णा अभवत्।
१७. धनवती महिला दानं करोति।
१८. आयुष्मान् भव वत्स!
१९. कान्तिमान् चन्द्रः आकाशे शोभते।
२०. श्रद्धावान् लभते ज्ञानम्।

विधिः --संज्ञापदेन सह मान्/वान्/मती/वती/मत्/वत् (मतुप्) इति योजनेन प्राप्तं यत् तद्धितान्तं, तत् कर्तृपदं भवति । यथा -
धन+मतुप् = धनवान्।
बल+मतुप्= बलवान्।
शक्ति+मतुप् = शक्तिमान्।
आयुः+मतुप्= आयुष्मान्। -- इत्यादि।
ज्ञातव्यं यत्, अ/आ-कारान्तशब्दः चेत् - वत् (वान्/वती/वत्), एवम् इ/उ/ऋ-कारान्तशब्दश्चेत् - मत् (मान्/मती/मत्) इति योजनीयम् ।
एतादृशशब्दः त्रिषु लिङ्गेषु सम्भवति। यथा -
बलवान्/बलवती/बलवत्।
शक्तिमान्/शक्तिमती/शक्तिमत्।
आयुष्मान्/आयुष्मती/आयुष्मत्। --- इत्यादि
इत्यादि ।

कृत्स्नेऽपि राष्ट्रे मङ्गलमयं धनतेरस पर्व सानन्दम् आचरितम् । धन-स्वास्थ्य-समृद्धीनां कामनया सह दीपोत्सव-महापर्वणः वर्तते मङ्गलमयः शुभारम्भः

कृत्स्नेऽपि राष्ट्रे मङ्गलमयं धनतेरस पर्व सानन्दम् आचरितम् । महादीपोत्सवस्य पूर्वसन्ध्यायाम आगतमिदं पावनं पर्व सुस्वास्थ्यस्य, धनधान्यस्य, मङ्गलमय-समृद्धेश्च अनुपमं प्रतीकं विभाति । अस्मिन दिव्ये अवसरे भक्ताः आरोग्यदाता देवः धन्वन्तरिम, ऐश्वर्यदात्रीं भगवतीं महालक्ष्मीं, धनाध्यक्ष कुबेरं च भक्त्या समभ्यर्चयन्ति। सुमुहूर्त कृता पूजा, नूतनद्रव्याणां क्रयणं च गृहे नित्यं श्रीं सुखं च सम्पादयतीति जनश्रुतिः। अस्याम् ऋद्धिमत्यां वेलायाम् उपराष्ट्रपतिः सी. पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्रमोदी च समस्तेभ्यः देशवासिभ्यः मङ्गलमयाः शुभाशयाः न्यवेदयन् ।